National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 275-279
© 2025 NJHSR
www.sanskritarticle.com

**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# रामभद्रसाहस्रमञ्जरीस्तोत्रेषु रसः

**कोलुसु गोविन्दराजुलु**

**सारांशः -** प्रस्तुते शोधपत्रे कवेः श्रीरामभद्रदीक्षितस्य 'रामसाहस्रमञ्जरी' तथा 'रामस्तवकर्णरसायन' इत्यादिषु स्तोत्रकाव्येषु रसयोजनायाः साङ्गोपाङ्गं विवेचनं कृतम् अस्ति। यद्यपि एतानि स्तोत्राणि मूलतः भगवद्विषयिण्या रत्या अर्थात् **भक्तिरसेन** ओतप्रोतानि सन्ति, तथापि अत्र अन्येषां रसानाम् अपूर्वः समन्वयः दृश्यते। शोधलेखकेन भरतमुनेः विश्वनाथस्य च रससिद्धान्तानुसारं काव्ये प्रमुखाणां पञ्चरसानां विभाव-अनुभाव-सञ्चारिभावादिभिः सह सोदाहरणं विश्लेषणं विहितम्। अस्मिन् (१) सम्भोगशृङ्गारः, (२) युद्ध-दया-धर्मादिभेदेन वीररसः, (३) संसारविरागजन्यः शान्तरसः, (४) रावण-भार्गवदर्पभङ्गप्रसङ्गे रौद्ररसः, तथा (५) भीतायाः जानक्याः वर्णने भयानकरसः च स्फुटतया आस्वाद्याः सन्ति। अतः एतानि स्तोत्राणि केवलं पूजात्मकानि न भूत्वा रसपूर्णकाव्यात्मकानि सन्ति इति सिद्धम्।

**कूटशब्दाः – ब्रह्मास्वादसहोदरः, स्थायिभावः, आलम्बनविभावः, उद्दीपनविभावः, अनुभावः, व्यभिचारी (सञ्चारी) भावः, सम्भोगशृङ्गारः , दयावीरः, शमः, धीरोद्धतनायकः ।**

नाट्यशास्त्रप्रणेता भरतमुनिः रसमेव काव्यस्य मूलं मन्यते । यथा बीजात् वृक्षः, वृक्षाच्च पुष्पं फलं च जायते, तथैव रसात् सर्वे भावाः प्रसरन्ति । आचार्यविश्वनाथमते रसः सत्त्वोद्रेकमयः, अखण्डः, स्वप्रकाशानन्दमयः, वेद्यान्तरस्पर्शशून्यः, **ब्रह्मास्वादसहोदरः** च उच्यते । जगन्नाथपण्डितराजानुसारं 'भग्नावरणा चिदेव रसः' अर्थात् अज्ञाननाशानन्तरं प्रकाशमानः स्थायिभावः एव रसः। रसः काव्यस्यात्मा। "न हि रसादृते कश्चिदर्थः प्रवर्तते" इति भरतोक्त्या रसस्य सर्वोपरित्वं सिद्धम् । ध्वन्यालोके रसः काव्यस्य जीवितम्, काव्यमीमांसायां काव्यप्राणः, साहित्यदर्पणे च **"वाक्यं रसात्मकं काव्यम्"** इति वदता विश्वनाथेन रस एव काव्यस्यात्मत्वेन स्वीकृतः।

मूलतः रसः एक एव, परन्तु उपाधिभेदात् तस्य नानात्वं भवति। काव्यशास्त्रे शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्त-वत्सल-भक्तिभेदेन **एकादश रसाः** मुख्याः सन्ति। विभाव-अनुभाव-व्यभिचारीणाम् संयोगेन सामाजिकानां हृदये स्थितः स्थायिभावः रसत्वं प्राप्नोति । एवं रसनिष्पत्तौ त्रीणि मुख्यानि उपकरणानि सन्ति । यथा – (१) **विभावः -** रत्याद्युद्बोधकः कारणरूपः । अयम् (क) आलम्बनविभावः (ख) उद्दीपनविभावः इति द्विधा । (२) **अनुभावः -** उद्बुद्धस्य भावस्य बाह्यप्रकाशकः कार्यरूपः (वागङ्गाभिनयादिः)। (३) **व्यभिचारी (सञ्चारी) भावः -** रसे विशेषेण सञ्चरणशीलः सहकारी हेतुः । एतेषां संख्या **त्रयस्त्रिंशत् (३३)** अस्ति (यथा- निर्वेद-ग्लानि-शङ्कादयः)। इत्थं विभाव-अनुभाव-सञ्चारिभावैः परिपुष्टः स्थायिभावः एव रसः कथ्यते । एतादृशस्य रसस्य सन्निवेशः कवेः श्रीरामभद्र-दीक्षितस्य काव्येषु कथं जातः इति अत्र आलोच्यते।

**रामभद्रसाहस्रमञ्जरीस्तोत्रेषु रसाः –** श्रीरामभद्रदीक्षितवर्याणां स्तोत्राणि भक्तिपरकाणि भवन्ति । अयं श्रीरामचन्द्रस्य अनन्यभक्त आसीत् । यत्र भगवद्विषयिणी रतिर्भवति सा भक्तिः । अलङ्कारशास्त्रे सः भाव इत्यपि निगद्यते । एवं भक्तिं भावं विहाय श्रीरामभद्रस्तोत्रेषु रसान्तराणां शृङ्गारादीनामपि आस्वादः सहृदयैः कर्त्तुं शक्यते । अत्र केषाञ्चन रसानामुदाहरणानि परिशीलयामः ।

**(१)शृङ्गाररसः -** शृङ्गं ऋच्छति इति श्रृङ्गारः । शृङ्गं नाम कामुकयुगलयोः उत्पीडकम् । अनेन कामोद्भवेन यः सम्भूयते सः श्रृङ्गार इत्युच्यते । अस्य रसस्य आलम्बनविभावः उत्तमप्रकृतियुक्तः भवति । परकीयाः अथवा अनुरागशून्या : वेश्यानायिकाः अस्य आलम्बनानि न भवन्ति । अस्या नायिकाः तथा च दक्षिणनायकाः अस्योपयुक्तमालम्बनानि भवन्ति । चन्द्र-चन्द्रिका-चन्दनानुलेपन-भ्रमरझंकारादय उद्दीपन- विभावाः भवन्ति । भ्रूविक्षेप-कटाक्षादयः अनुभावाः भवन्ति । औग्र्य-मरण-आलस्य-जुगुप्सादि- व्यभिचारि-भावान् विहाय अन्ये अस्य श्रृङ्गारस्य पोषकाः भवन्ति । रतिः अस्य स्थायिभावोऽस्ति । अस्य वर्णः श्यामः देवता च विष्णुः । शृङ्गारः विप्रलम्भसम्भोगभेदेन द्विविधोऽस्ति ।[1]

श्रीरामभद्रदीक्षितमहाभागस्य स्तोत्राणि यद्यपि शान्तरस-प्रधानानि, भावप्रधानानि अथवा भक्तिप्रधानानि भवन्ति, तथापि तत्र तत्र रामायणकथोपन्यासे श्रीराम-सीतयोः पञ्चवटीवने कृतः प्रणयवृत्तान्तोऽपि स्मतिपथारूढः मानसे अपूर्वां रतिभावनां सृजति । एषा रतिः भक्त्यधीना भावाधीना चेति कारणात् गुणीभूतव्यङ्ग्ये प्रत्येकमपि तादृशं पद्यं गणयितुं शक्यते । उदाहरणं यथा –

**क एष दलदुत्पलद्युतिरुदारवेषोज्ज्वलः**
**स्वयं विशति मे मनस्त्वरितमाः परिज्ञायते ।**
**स एष ननु जानकीकुचतटीपटीरद्रव-**
**प्रसक्तघनवासनाघुमुघुमायमानः प्रभुः ।।[2]**

अत्र कवेः मानसे श्रीरामचन्द्रस्य प्रस्फुरितमूर्त्तिः विभाति । कविः तां मूर्त्तिं श्रीजानक्याः कुचतटीपटीरद्रवेण प्रसक्ता या घनवासना तया घुमुघुमायमानत्वेन कल्पयति। एवं सम्भोगशृङ्गारस्य आस्वादनाय प्रकृष्टान्युपकरणानि अत्र प्राप्यन्ते। श्रीरामचन्द्रः, सीतदेवी च आलम्बनविभावौ स्तः । श्रीरामचन्द्रस्य दलदुत्पलद्युतिः, उदारपूर्णः उज्ज्वलवेषः, जानक्याः कुचतट्यां लिप्तः पटीरद्रवः इत्येते उद्दीपनविभावाः, श्रीरामचन्द्रस्य मनसि जाता घुमुघुमायमान-शब्दः अनुभावः, आवेगः व्यभिचारिभावश्च मिलित्वा रतिर्नाम स्थायिभावं जागरयन्ति। सा च रतिः सम्भोगशृङ्गाररसरूपेण परिणतः सहृदयैरास्वाद्यते ।

एवमेव –

**भजे शरधनुर्धरं विकटचित्रकूटाटवी-**
**चरं कामपि शङ्करप्रणयिनीप्रियाख्यं प्रभुम् ।**
**स्फुटं कलितकुङ्कुमा वदति यस्य वक्षस्तटी**
**मृगेन्द्ररसितत्रसज्जनकजाहठालिङ्गनम् ।।[3]**

अस्य श्लोकस्य प्रथमार्धः कवेः श्रीरामभद्रस्य भजनभक्तेः पराकाष्ठाम् अभिव्यनक्ति। अपि च द्वितीयार्धः शृङ्गारास्वादनं कारयति । श्रीरामचन्द्रस्य वक्षस्तटी कुङ्कुमलिप्ता दृश्यते । यदा पञ्चवट्यां मृगेन्द्रस्य सिंहस्य नादः श्रीजानक्या श्रूयते स्म, तदा भीत्या सा जानकी सत्वरं श्रीरामम् आलिङ्गति । तेनालिङ्गनेन सीतामातुः नेत्रकुङ्कुमं श्रीरामचन्द्रस्य वक्षस्तट्यां लिप्तं भवति । तदेव कविना स्फुटतया अवलोक्यते। अत्र श्रीरामसीतयोः सम्भोगशृङ्गारः स्फुटतया आस्वाद्यते सहृदयैः पाठकैः कविना च ।

अपि च,

**कह्लाराम्बुजगन्धिमन्दपवने खेलन्मृगालङ्कृते**
**कूजत्कोकिलबालचूतगहने कूले सरय्वाः शुभे ।**
**पश्यान्वेति शुकं शुकीति चिबुके गृह्णन्करेण प्रियां**
**चित्ते भाति स कोऽपि मे दशशिरोमत्तेभकण्ठीरवः ।।[4]**

अस्मिन् श्लोके शृङ्गारस्य उद्दीपनविभावाः बहुधा वर्णिताः। यथा – मन्दपवनः, क्रीडा-रताः मृगाः, कूजन्तः कोकिलाः, आम्रवृक्षेषु चूतानि, सरयूनद्याः तटप्रदेशः, शुकशुक्योः परस्परासक्तिदृश्यम् इत्यादयः। श्रीरामः, सीता च आलम्बनविभावौ । श्रीरामेण सीतायाः कर-ग्रहणम् अनुभावः । एतेषां परस्परसंयोगाद्रतिः स्थायी भावः शृङ्गाररूपेणास्वाद्यते ।

एवमेव कविः रामभद्रः रामस्तवकर्णरसायनकाव्ये प्रथमनिष्यन्दे श्रीरामः सीतायाः शिरः अङ्के निधाय उपविष्टस्य श्रीरामस्य प्रणयचित्रम् उपस्थापयति । उद्दीपनविभावरूपेण तत्र केकिनां मादकता, मन्दाकिनीमेदुरता, केसरतरूणां शीतलच्छाया, कुशास्तरणम् इत्यादयः वर्णिताः ।

**माद्यत्केकिनि चित्रकूटकटके मन्दाकिनीमेदुरे**
**प्रत्यग्रप्रसवस्य केसरतरोः प्रच्छायशीते तले ।**
**कौशेयास्तरणे विदेहदुहितुः कुर्वाणमङ्के शिरो**
**नीलाम्भोदनिभं भजे रघुकुलप्राचीनभाग्यं प्रभुम् ।।[5]**

एवमेव कविः पञ्चवट्यां पुष्पावचनयरतायाः जानक्याः अङ्गसौष्ठवं वर्णयति, अपि च प्रच्छन्ने स्थितेन श्रीरामचन्द्रेण देव्याः श्लथनीविदर्शनमपि उपस्थापयति। एतत्सम्भोगशृङ्गारस्य अपूर्वमुदाहरणमिति वक्तुं शक्यते । यथा –

**संरम्भस्खलितोत्तरीयमवनिन्यस्ताग्रपादं भुजा-**
**वुद्यम्य श्लथनीवि पुष्पनिचयं सङ्गृह्णतीं जानकीम् ।**
**पश्यन्पञ्चवटीवने मुहुरपि प्रच्छन्न एवान्तिके**
**हस्तोपात्तधनुःशरः स्फुरति मे चित्ते रघुग्रामणीः ।।[6]**

एवं रामस्तवकर्णरसायने नैकेषु श्लोकेषु कविः श्रीराम-जानक्योः नित्यरासं स्मरति, यत्र शृङ्गारस्य अपूर्वास्वादः सहृदयैः कर्त्तुं शक्यते ।

तत्रैव द्वितीयनिष्यन्दे शृङ्गारस्योदाहरणं यथा –

**सान्द्रं पुष्प्यति चम्पकः कुरवको धत्ते नवान् कोरकान्**
**माकन्दः स्तबकान् व्यनक्ति वकुलः पुष्पाणि पुष्णाति च।**
**झङ्कुर्वन्ति मधुव्रता विदधते चारुस्वनं कोकिलाः**
**पश्येति क्षितिकन्यकामनुनयन् दीव्यत्यटव्यां प्रभुः ।।[7]**

अत्र चम्पकपुष्पाणां विकासः, कुरवकाणां कोरकधारणम्, माकन्दस्य स्तवकाविष्कारः, वकुलपुष्पाणां परिपुष्टिः, मधुव्रतानां झङ्कारः, कोकिलानां मधुररावः इत्येते सर्वेऽपि शृङ्गारस्य उद्दीपनविभावाः। क्षितिकन्यका सीता, रामचन्द्रश्च आलम्बनविभावौ। श्रीरामचन्द्रेण कृतः अनुनयः अनुभावः। एवमेतेषां संयोगाद्रत्याख्यः स्थायिभावः शृङ्गाररूपेण परिणतः सहृदयैः आस्वाद्यते ।

**(२)वीररसः –** उत्साहस्थायिभावको भवति वीररसः। उत्तमप्रकृतिकः जनोऽस्याश्रयः, वर्णः सुवर्णः, देवता महेन्द्रः, आलम्बनं विजेतव्यः शत्रुः, उद्दीपनं शत्रोश्चेष्टाः, अनुभावाः युद्धादिसामग्र्योऽथवा अन्यान्यसाधनानामन्वेषणं, धृति-मति-गर्व-स्मृति-तर्क-रोमाञ्चाः व्यभिचारिभावाः भवन्ति । अस्य रसस्य चत्वारो भेदाः उच्यन्ते । यथा - (१) दानवीरः (२) धर्मवीरः (३) युद्धवीरः (४) दयावीरश्च ।[8]

श्रीरामभद्रदीक्षितस्तोत्रेषु श्रीरामचन्द्रस्य धर्मवीरता, युद्धवीरता, दयावीरता च बहुधा वर्णिताऽस्ति। लोके "रामो विग्रहवान् धर्मः" इति प्रथितविषयोऽस्ति। लोकधारणार्थं श्रीरामचन्द्रस्य प्रत्येकमपि कार्यजातं कविना रामस्तवकर्णरसायन-काव्ये वर्ण्यते। रावबाणस्तवः, रामचापस्तवश्च श्रीरामचन्द्रस्य धनुषः वैशिष्ट्यं प्रतिपादयतः । अनयोः स्तोत्रयोः रामस्य युद्धवीरता बहुत्र आस्वाद्यते । भक्तवत्सलस्य श्रीरामचन्द्रस्य दयादृष्टेरपि वर्णना तत्र तत्र प्राप्यते। एवं वीररसस्य कानिचनोदाहरणानि अत्र पश्यामः।

**दलितदनुजाटोपे चापाधिरोपितसायके**
**मरतकमणिच्छायादायादकायमहोभरे ।**
**प्रणतजनताप्राणत्राणप्रवीणपराक्रमे**
**स्फुरति पुरतोऽस्माकं सीतापतौ दुरितं कुतः ।।**[9]

अस्मिन् श्लोके श्रीरामचन्द्रः आलम्बनविभावः। श्रीरामचन्द्रेणानेन दनुजानामाटोपः गर्वः दलितः। अयं स्वधनुषु सर्वदा सायकान् आरोप्य तिष्ठति । प्रणतजनानाम् अयं सर्वदा प्राणान् रक्षति। अस्मिन् सन्दर्भे तस्य पराक्रमः अतुलनीय एव अस्ति । एतादृशः गुणशीलः श्रीरामः यत्र वर्तते तत्र दुरितं कदापि नायाति । एवं श्रीरामस्य पराक्रमः उत्साहं जनयति। स एवोत्साहः स्थायी भावः वीररसरूपेण परिणतः सहृदयैरास्वाद्यते। अत्र श्रीरामचन्द्रः उत्तमप्रकृतिकः। दनुजाः आलम्बनविभावाः। दानवानामाटोपः गर्वः व्यभिचारिभावः। युद्धसामग्री सायकः, तस्य चापे आरोपणम् अनुभावः। युद्धवीरस्येदमुदाहरणम् ।

**यथा च,**

**रणप्रवणरावणव्रणदबाणमोक्षक्षण-**
**क्वणद्गुणधनुर्ध्वनित्वरितमारितारिव्रजः ।**
**जगद्दुरितजर्जरीकरणजागरूकक्रमो**
**मम व्यपनयेद्भयं मनुकुलप्रवीराग्रणीः ।।**[10]

अस्मिन् श्लोके प्रथमार्धे श्रीरामस्य पराक्रमः वर्ण्यते । रणप्रवणस्य रावणस्य शरीरे व्रणं दातुं सक्षमाः बाणाः श्रीरामस्य समीपे आसन्। तस्य बाणस्य मोक्षणेन गुणाः क्वणन्तः धनुर्ध्वनिं सृजन्ति। तेन सर्वोऽपि अरिवर्गः मारितो भवति। एवमत्र अरिवर्गः, रावणश्च शत्रुपक्षः, श्रीरामचन्द्रः आलम्बनलविभावाः। परस्परं युद्धम् युद्धिपनविभावः। बाणमोक्षणम्, गुणानां कम्पनम्, धनुर्ध्वनिनिर्गमः, इत्येते अनुभावाः। शत्रूणां मरणम् व्यभिचारिभावः। एतेषां सर्वेषाम् अपि संयोगाद् उत्साहस्थायिभावः युद्धवीररसरूपेण परिणतः आस्वाद्यते सहृदयैः ।

वीररसस्य आलम्बनेषु धीरोद्धतनायकः प्रधानो भवति । कविः श्रीरामभद्रः एकत्र श्रीरामचन्द्रस्य **धीरोद्धतनायकस्वरूपं** वर्णयति । यथा –

**हत्वा चण्डपराक्रमं दशमुखं क्षिप्रं रणप्राङ्गणे**
**वामं न्यस्य करं शरासशिखरे सव्ये शरं बिभ्रतः ।**
**बन्धस्रंसिजटाभरस्य निटिलव्याकीर्णघर्माम्भसो**
**देवस्यावतु नस्त्रिभङ्गिललिता धीरोद्धता च स्थितिः।।**[11]

श्रीरामभद्रः श्रीरामचन्द्रस्य **दयावीरस्वरूपमपि** प्रतिपादयति। यथा –

**स्वच्छन्दं कपिभिर्विहृत्य सुतरामाश्लिष्य दिव्यान्मुनीन्**
**दिक्पालेष्ववतीर्य मन्दमितरान्देवानतीत्याञ्जसा ।**
**दीनं दूरत एव साध्वसवशात्तिष्ठन्तमेतीव मां**
**देवस्य क्षणदाचरेन्द्रजयिनो दृष्टिर्दयाशीलता ।।**[12]

अत्र भगवतः श्रीरामचन्द्रस्य दयशीलता दृष्टिः वर्ण्यते । भगवान् भक्तप्रियो भवति । पीडितानां भक्तानां कृते सर्वदा तस्य मनसि दया वर्तते। तस्मात्कारणादेव श्रीरामचन्द्रः अवतारं स्वीकृत्य धरायामागतः आसीत्। कविर्लिखति यत् श्रीरामस्य दयादृष्टिः कपीनामुपरि दयां प्रदर्श्य तैः सह विहरणं कृत्वा, दिव्यमुनीनाम् उपरि दयां कृत्वा तेषामालिङ्गनं विधाय, दिक्पालेषु अवतीर्य, देवगणानां मध्ये अञ्जसा अतीत्य भयेन निवसतः दीनस्य कवेः समीपम् आयाति इति । वीररसेषु दयावीरो अन्यतमोऽस्ति । अत्र श्रीरामस्य उत्साहः भक्तजनरक्षणाय उक्तः, अयमेव स्थायिभावः वीररसत्वेन आस्वाद्यो भवति सहृदयानाम् ।

एवमस्य रसस्यान्यानि उदाहरणानि रामबाणस्तव-रामचापस्तवयोः पृथक्तया परिशीलयितुं शक्यन्ते । ग्रन्थवृद्धिभयात् केवलं किञ्चिदत्रोपस्थापितम् ।

**(३) शान्तरसः –** शमस्थायिभावकः रसोऽस्ति शान्तः । उत्तमाः जना अस्य रसस्यास्वादनं कर्तुं प्रभवन्ति। रसस्यास्य वर्णः कुन्दपुष्प-चन्द्र-वत्सुन्दरच्छायः धवलो भवति। नारायणोऽस्य देवता। अनित्यः संसारः त्रितापदग्धोऽस्तीति विचिन्त्य सांसारिकविषयान् प्रति अरुचिः, तेषां निःसारतायाः ज्ञानं, परमात्मनः स्वरूपज्ञानं च यः प्राप्नोति सः शान्तरसस्य आलम्बनविभावः। पवित्राश्रमः, भगवतः लीलाभूमिः, तीर्थस्थानम्, रम्यकाननम्, साधु- संगतिश्चादयः अस्योद्दीपनविभावाः । रोमाञ्चः, दया, संन्यस्ततादयः, अनुभावाः कथ्यन्ते । निर्वेदः, हर्षः, स्मरणं, मतिः, धृतिः, भूतदया (सर्वजन्तुषु दया) औत्सुक्यादयो व्यभिचारिभावाः सन्ति ।[13]

श्रीरामभद्रदीक्षितस्तोत्रेषु शान्तरसः प्रधानो भवति। अत्र नैकानि उदाहरणानि अस्य रसस्यास्वादने सहायकानि भवन्ति। दिङ्मात्रमत्र प्रदर्श्यते यथा-

**निगमशिखरिशृङ्गान्नित्यमागत्य खेल-**
**न्मुनिजनहृदरण्ये मोहसारङ्गमुक्ते।**

**दशवदनगजेन्द्रे दर्शिताघातलीलो**
**वशयति रघुसिंहो मानसं नः प्रसन्नः ।।**[14]

अस्मिन् श्लोके निगमाः वेदाः पर्वततुल्याः इति कल्पिताः । तत्रैव भगवान् श्रीरामचन्द्रः मुख्यः प्रतिपाद्यः ईश्वरोऽस्ति । तस्मात् पर्वतात् सः समागत्य मुनिजनानां हृदयवने यः मोहमृगः वर्तते, तं व्यापादयति। अपि च कविना अत्र दशेन्द्रियाणि रावणस्य दशमुखवत्कल्पितानि। स चासौ दशमुखः रावणः गजेन्द्रसमानः मुनिजनानां हृदयारण्यं विनाशयति । गजस्य हननार्थं यथा सिंहो भवति तथैव रावणस्य हननार्थं श्रीरामचन्द्रः सिंहतुल्यः कल्पितः। अयमेव श्रीरामचन्द्रः इन्द्रियाणि वशीकर्त्तुं समर्थः। असौ एव मुनिमानसं प्रसन्नं कर्त्तुं प्रभवति । एवं श्रीरामचन्द्रस्य स्तुतिः, मुनीनां हृदयारण्यम्, तत्र मोहरूपकः सारङ्गः, रावणस्य दशाननसदृशानि दशेन्द्रियाणि, तेषां वशीकरणम्, मानसशुद्धिः, मोहत्यागः इत्ये सर्वेऽपि विषयाः शान्तरसपोषकाः भवन्ति । एतैरेव शमः स्थायी भावः शान्तरसरूपेण परिणतः सहृदयैरास्वाद्यते ।

एवमेव अधोलिखितानि कानिचन पद्यानि शान्तरस्योदाहरणत्वेन प्राप्यन्ते रामभद्रस्य स्तोत्रेषु। एतेषु स्तोत्रेषु संसारस्यासरता, मुक्तेः मार्गः, जीवनमूल्यम्, मृत्युभयम्, वयसः अस्थिरता, पत्न्याः अध्रुवप्रीतिः, सम्पत्तेः नश्वरत्वम्, बान्धवानां क्षणिकत्वम्, तृष्णा, कामः, क्रोधः, लोभः, मोहः, इन्द्रियाणां वशे स्थितिः इत्यादयः नैके विषयाः सांसारिकदुःखप्रकाशकाः वर्णिताः। तेभ्यः मुक्तिं प्राप्तुमुपायः श्रीरामस्तुतिरित्यपि उल्लिखितः। एवं सर्वपरिशीलनेन शान्तरसः शमस्थायिभावकः अत्र कविभिः आस्वाद्यते। यथा यथा संसारस्य निःसारता ज्ञायते, तस्माद्विरागः उत्पद्यते। स एव शमभावः शान्तरसस्य स्थायीत्युच्यते। उदाहरणानि यथा -

**अर्धावर्तितमन्त्रमधर्धविरतस्वाध्यायमर्थोज्झित-**
**ब्रह्मोपासनमर्धमुक्तहवनातिथ्यादिसर्वक्रियम् ।**
**दृष्ट्वा पञ्चवटीजुषो यमृषयः सार्थं तपो मेनिरे**
**कन्दर्पायुतसुन्दरं व्रजति मे काकुत्स्थमेनं मनः ।।**[15]

अत्र पञ्चवट्याश्रमवर्णना, तत्र ऋषीणाम् ब्रह्मोपासना, यज्ञक्रिया, स्वाध्यायः, मन्त्रोच्चारणं सर्वमपि शान्तरसपोषकं भवति। तत्रापि श्रीरामेण साकमृषीणां मेलनमपूर्वं शमभावं हृदये जनयति। तथैव,

**अशनिपरुषघोषा जीवितं हर्तुकामा**
**यमभटजनपक्तिर्याविदायाति भीमा ।**
**मरतकमणिनीले मैथिलीकेलिलोले**
**महिमनि मम तावन्मग्नमस्त्वन्तरङ्गम् ।।**[16]

अत्र मृत्योर्विभीषिका वर्णिता अस्ति । यन्मनसि निर्वेदं जनयति। अपि च,

**वयश्चतुरमस्थिरं गुणवती वधूरध्रुवा**
**न संपदविनश्वरा न चिरजीविनो बन्धवः ।**
**इति स्वयमवेत्य चिद्घनसदात्मके शाश्वते**
**रमस्व रघुपुंगवे हृदय नान्यदालोचय ।।**[17]

अत्र आयुः अस्थिरम्, वधूः अध्रुवा, सम्पदः नश्वरता, बन्धूनां क्षणजीवनम् इत्यादयः विषयाः संसारस्य निःसारतां प्रतिपादयन्ति । तेन निर्वेदः जायते । पुनश्च,

**आमनेम यदि कोमलवर्णं**
**रामनाम भुवने महनीयम् ।**
**व्योमसीमनि वसेम सुखाढ्ये**
**धाम डामरमियाम न याम्यम् ।।**[18]

मुक्त्यर्थं रामनामस्मरणं करणीयमिति अत्रोच्यते। तेन शमभावः उद्दीपितो भवति ।
तथैव,

**कर्माणि श्रुतिचोदितानि न मया कर्तुं क्षमाण्यन्वहं**
**संत्यक्तुं च न पारयामि विषयासक्तो निषिद्धाः क्रियाः ।**
**का नामेन्द्रियनिग्रहे मम कथा दीनः पतिष्याम्यध-**
**स्तस्मान्मां रघुवीर पाहि दयया दासोऽस्मि तुभ्यं नमः ।।**[19]

अत्र कवेः सांसारिकभोगविलासलिप्तता, पापकर्मणि प्रवृत्तिः, विषयासक्तिः, निषिद्ध-क्रियाणामनुष्ठानम्, इन्द्रियवशीभूतता, दीनभावना इत्यादयः विषयाः वर्णिताः । तेन तस्य पीडा ज्ञयते । ततश्च निर्वेदः स्थायी भावः शान्तरसरूपेण परिणतः सहृदयैरास्वाद्यते ।

**(४) रौद्ररसः –** क्रोधस्थायीभावो रौद्ररसः । अस्य वर्ण: रक्तः, देवता रुद्रः, आलम्बनं शत्रुः, उद्दीपनं शत्रोश्चेष्टादयः । यथा – मुष्टिप्रहारः, भूपातनम्, भयङ्करच्छेदनं, शरीरविदारणं, संग्रामः, सम्भ्रमश्च । अस्य अनुभावा:भ्रूभङ्ग-ओष्ठनिर्दंशन-बाहुस्फोटन-तर्जन-स्वकृतवीर-कर्मवर्णन-शस्त्रोत्क्षेपण-उग्रता-आवेग-रोमाञ्च-स्वेद-कम्प-मद-आक्षेप-क्रूरदृष्ट्यादय: भवन्ति। मोहामर्षादयः अत्र व्यभिचारिभावा: ।[20]

श्रीरामभद्रदीक्षितस्य स्तोत्रेषु अस्योदाहरणं यथा -

**धाराधीश्वरवंशमण्डयितरि क्रोधोत्पतत्ताडका-**
**हन्तर्यध्वररक्षितर्युषिवधूशापव्यपाकर्तरि ।**
**चन्द्रापीडशरासभेत्तरि महीकन्यासमुद्वोढरि**
**क्रुद्धद्धार्गवदर्पभङ्क्तरि मनः कुर्यां नृवर्यात्मजे ।।**[21]

**यथा वा –**

**रणभुवि कृतलङ्कातङ्कहुङ्कारगर्भ**
**भ्रुकुटिविकिटवक्त्रः कार्मूकारूढपत्रः ।**
**निखिलनिजसपक्षक्षेमकामः पुरो मे**
**स भवतु रघुवीरः साध्वसध्वंसहेतोः ।।**[22]

**(५) भयानकरसः -** भयस्थायिभावको भयानकरस: । अस्य वर्ण: कृष्ण:, देवता काल: । अस्याश्रया: स्त्रीयोऽथवा नीचप्रकृतिका: जना: भवन्ति । आलम्बनं भयोत्पादकपदार्था:, भयोत्पादकपदार्थानां चेष्टा उद्दीपनविभावा इत्युच्यन्ते। विवर्णता-गंदभाषण-प्रलय-स्वेद-रोमाञ्च-कम्प-इतस्ततोऽव-लोकनानि अस्यानुभावा: कथ्यन्ते। जुगुप्सा-आवेग-संमोह-संत्राह-ग्लानि-दीनता-शङ्का-अपस्मार-संभ्रम-मरणादयोऽस्य व्यभिचारिभावा: सन्ति ।[23]

श्रीरामभद्रदीक्षितस्तोत्रेषु अस्योदाहरणं यथा,

**शैलोन्मत्तोऽवतरति करी ज्यास्वनैर्वारयैनं**
**सौमित्रे मा भवतु चकिता जानकीति प्रह्विण्वन्।**
**तज्ज्याघोषं मृगपतिरवं व्याहरन्वेपिताङ्ग्या**
**गाढाश्लिष्टो जनकसुतया कौसलेयोऽवतान्नः ।।**[24]

यथा च,

**उत्प्लुत्य व्रजतां स्फुटभ्रुकुटिकं हुङ्कारमातन्वतां**
**बालाग्राणि विधून्वतां किलिकिलाकोलहलं कुर्वताम् ।**
**योधानामरविन्दकेसररुचां मध्ये तमध्येति मे**
**चेतश्चापशिलीमुखोज्ज्वलकराम्भोजं रघूणां प्रभुम् ।।**[25]

**उपसंहारः -** निष्कर्षेण वक्तुं शक्यते यत् श्रीरामभद्रदीक्षितस्य स्तोत्रसाहित्यं केवलं शुष्कवेदान्तपरं वा भक्तिमात्रप्रधानं न भूत्वा रसवैविध्येन समृद्धं वर्तते। कवेः अनन्यरामभक्तिः यत्र काव्ये प्रमुखं स्थानं भजते, तत्रैव सा भक्तिः शृङ्गार-वीर-शान्तादिरसान् अङ्गत्वेन अङ्गीकरोति। कविना पञ्चवटीप्रसङ्गेण सीता-रामयोः अलौकिकप्रणयमुपस्थाप्य शृङ्गारस्य, रावणवधादिप्रसङ्गेन वीर-रौद्रयोः, तथा संसारस्य नश्वरतां प्रतिपाद्य शान्तरसस्य च या पराकाष्ठा प्रदर्शिता, सा सहृदयानां चेतः आल्हादयति। अतः कवेः एषा रससमीक्षा तस्य काव्यकौशलं शास्त्रपाण्डित्यं च प्रमाणीकरोति। रसयोजनया एतानि स्तोत्राणि सहृदयपाठकानां कृते परमानन्ददायकानि 'कर्णरसायनानि' जातानि इत्यत्र नास्ति संशयः।

**सहायकग्रन्थानां विवरणम्**


**(**१) **साहित्यदर्पणः** (तृतीयपरिच्छेदः)। आचार्यविश्वनाथप्रणीतः। डाँ. सत्यव्रतसिंहव्याख्या। चौखम्बा विद्याभवन, वाराणसी। २०१५ (पुनर्मुद्रितम्) ।

(२)**रामस्तवकर्णरसायनम्** (निष्यन्दः १, २)। श्रीरामभद्रदीक्षित-विरचितम्। निर्णयसागर प्रेस, मुम्बई, १९३२ (प्राचीन-संस्करणम्)/ राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, २००४ ।

(३)**नात्यशास्त्रम्** (रसविमर्शः)। भरतमुनिप्रणीतम्, अभिनवगुप्तकृत-अभारतीटीकासहितम्। चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, २०१० ।

(४)**काव्यप्रकाशः** (उल्लासः४)। मम्मटाचार्यविरचितः। आचार्यविश्वेश्वरसिद्धान्तशिरोमणिटीका ज्ञानमण्डल लिमिटेड, वाराणसी, २०१२ ।


**सन्दर्भ ग्रंथाः**

1 सा.द. – ३/१८३-१८६
2 रा.स्त.क.र. – १/१३
3 रा.स्त.क.र. – १/१४
4 रा.स्त.क.र. – १/१८
5 तत्रैव – १/१९
6 तत्रैव - १/२१
7 तत्रैव – २/२४
8 सा.द. - ३/२३२-२३४
9 रा.स्त.क.र. – १/३६
10 तत्रैव – १/१५८
11 तत्रैव – २/१९
12 रा.स्त.क.र. – २/७३
13 सा.द.-३/२४५-२५१
14 तत्रैव – १/४७
15 रा.स्त.क.र. – १/२४
16 रा.स्त.क.र. – १/१४०
17 तत्रैव – १/१५५
18 तत्रैव – २/६
19 तत्रैव – २/१११
20 सा.द. - ३/२२७-२३१
21 तत्रैव – १/२१
22 रा.स्त.क.र. – १/१५७
23 सा.द. - ३/२३५-२३८
24 रा.स्त.क.र. – १/३०
25 रा.स्त.क.र. – २/६९